


**E-ISSN:** 2706-8927
**P-ISSN:** 2706-8919
IJAAS 2019; 1(1): 126-127
Received: 27-05-2019
Accepted: 29-06-2019

डॉ0 संजय कुमार झा
शिक्षक, रा0उ0 विद्यालय, सिंघाड़ा, महुआ, वैशाली, बिहार, भारत

**Corresponding Author:**
डॉ0 संजय कुमार झा
शिक्षक, रा0उ0 विद्यालय, सिंघाड़ा, महुआ, वैशाली, बिहार, भारत

# अदितिरूपा दिव्यसत्ता

डॉ0 संजय कुमार झा

## सारांश
अदितिः देवमातास्ति। इयं आदिमातापि कथ्यते। न दितिः इति अदितिः अर्थात् यस्य खण्डं, अंशं भागं वा कर्तुमशक्यते तत् परम अवयवः अदितिः। इयं जगतः आधारमूला शक्तिर्विद्यते। अनयैव जगतः अधिष्ठाता परमेश्वरः सृष्टरचना रचयति। इयं मौलिकसत्ता अखण्डनीया। इयं मूलद्राव्यिकं कारणं विद्यते। एषा अवयवरहिता भागोत्तमा। तस्या विभाजनं असंभवम्।

## परिचय
स्वामीदयानन्दमहोदयस्य शब्देषु ''न विद्यते दितिर्वि नाशो यस्य सोऽयमदितिः''[1] अर्थात् यस्या क्षयमसंभवम् सा अदितिः। अखण्डतत्त्वेयमुत्पत्तिरहिता आदिरहिता च। इत्थं अदितिः अनादिः अनन्ता च। व्याकरणाशास्त्रानुसारेण ''अद्भक्षणेः'' धातोः इति प्रत्यंय संयुज्य अदितिशब्दः सिद्धिर्जातः। अदितिः सर्वेषां भक्षणं करोति, अदितिः स्वस्मिन् सर्वेषां समाप्नोति अस्मिन्नैव सर्वे लयं प्राप्नुवन्ति किम्वा सर्वेषां अतिमं पर्यवसांन इतिश्री वा भवति परं अदितिः स्वयमभक्ष्यं वर्तते। घटकरहिंत निरावयवं च। अदितेर्परिणामं भवितुं खलु अयं दृश्यमान जगत् आदित्यं कथ्यते। ऋग्वेदे वर्णनं विद्यते यत् यः अदितेर्संबद्धः स आदित्यः। ''अदितरिदमदितेयम्।''[2] वेदेषु भौतिकजगतः मूलाधारः अदितिः प्रोच्यते इयमाद्यनाद्यचेतनाजन्मारूपेषु निरुपिता।
ऋग्वेदस्यैकऋचा प्रमाणभूता यत् अदितिः अमृतविशेषणैः विभूषिता। अखण्डेयंपरममूला ;न्सजपउंजमद्ध भौतिकसत्ताविद्यते – ''अग्निर्द्यावा पृथिवी विश्वजन्ये आ भाति देवी अमृतं असूर। क्षयन्वाजै पुरूश्चन्द्रो नमोभिः।।''[3] इयं न तु जन्मदात्री, प्रत्युत् भौतिक जगतः उपादान कारणमपि विद्यते।
अदितर्परमेश्वरौ उभौ सह अस्तित्ववन्तौ नित्यौ च स्तः। अदितिः यथा अस्य जगतः उपादानकारणं तथैव ईश्वरोऽपि निमित्तकारणम्। उपादानकारणं तत् कारणं यस्मिन् कारणं स्वयमेव कार्यरूपे फलितार्थः। निमित्तकारणं तत् कारणं यं बिना कार्यरूपी सत्ता निराधारः। अदितेर्परिणामं भवितुं दृश्यमान चारचर कार्यजगत् आदित्यः कथ्यते। कार्यस्य सत्ता कारणेविद्यमानः कारणं कार्येणाभिन्नः भवितुं न शक्यते सत्कार्यवादस्य सिद्धान्तः नः इति विवीच्यते। न्यायदर्शनस्य मतानुसारेण ''कार्य नियतपूर्ववृत्ति कारणं''[4] ''कार्यं प्रागभाव प्रतियोगी''[5] इत्यनयोः कारिकसूत्रयोः कारणकार्ययोः ऐक्यं सिद्धम्। अत्र विज्ञानस्य महानतमस्य रहस्यंस्य पटाक्षेपः भवति यत्र अदितिः नित्य अधिष्ठितः तत्रैव ईश्वरः नित्य अधिष्ठिता। ईश्वरस्य निमिंत्तेनैव आधारमूलाशक्तिरदितिः सृष्टिप्रलययोः निर्बाधचक्रे परिभ्रमति। एवं प्रकारेण उपादानमूला अदितिः निमित्तमूलः ईश्वरः उभौ मिलित्वौ। जगतः संचालयतः। ऋग्वेदस्य एकस्मिन मन्त्रो अभिहितः यत्र मूलस्वरूपा अदितिमाता ईश्वर सदृशः नित्यः स्वयंभूश्च।। इयं सगुणा सत्वसम्पन्ना च।
अदितिमाता एव सप्तवर्गीकृत दृश्यमानजगत् समुद्भवति। सकलभौतिकजगत् सप्तप्रमुखवर्गेषु विभज्य परिभाषितुं शक्यते – भूः, भुवः, सुवः, जनः, तपः, महः सत्यम् इति वेदवर्णितं सप्तकृतजगत् अथवा द्रव्य, गुण – कर्म – सामान्यः – विशेष – समवायः – अभावाः इति तर्कसंग्रहकारानुसारेण सप्त पदार्थाः। एतासां सप्त भौतिक सत्तानां उपादानकारणं एकैव केन्द्रीकृत स्वयंभूसत्ता सत्ता अदितिः (प्रकृतिः) अस्ति।[6] सिद्धान्तोऽयं नानरूपेषु अनेकेषु मन्त्रोषु निहितः। ऋग्वेदानुसारेण अदितिः मूलशक्तिविर्द्यते ब्राह्मीअवस्था जायते। सृष्टिर्यज्ञः अदितेः आरभ्य अदित्यामेव इतिश्री लभते।

निष्कर्ष

अतः स्पष्टः भवति अदितिः ब्राह्माण्डस्थ महती शक्तिर्विद्यते। दृश्यमान जगत् अस्याः परिणामः। इयमाधारमूला दिव्यशक्तिः यस्यां सर्वे भूताः समाविष्टा। अदित्यां सर्वेषां पर्यवसानं भवति परं सा स्वयं भौतिकपदार्थेभ्यः पृथक्रूपेण तिष्ठति। एषा एकलनिरावयवी सत्ता। प्राणप्रदायिनी अदितिमाता परमात्मरूपे न तु सकलप्राणिषु अंतःकरणेऽधिष्ठिता, प्रत्युत् सर्वतो समभावेन समादृता च। अदितिरूपा मूल प्रकृतिः परमेश्वरौ च उभौ परस्परौ मिलित्वा समेकित रूपेण जगतः संचालयतः

सन्दर्भ–सूची

1. सत्यार्थ प्रकाशः – स्वामी दयानन्द सरस्वती
2. ऋग्वेद – 1/80/10
3. ऋग्वेद – 3/25/3
4. तर्कसंग्रह – कारणलक्षणम्
5. तथैव – कार्यलक्षणम्
6. ऋग्वेद – 1/41/2